श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ एकोनसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness* śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनसप्ततितमः सर्गः ॥

## रावणस्य पुत्राणां बन्धूनां च युद्धाय प्रस्थानमङ्गदेन नरान्तकस्य वधश्च

एवं विलपमानस्य रावणस्य दुरात्मनः।
श्रुत्वा शोकाभिभूतस्य त्रिशिरा वाक्यमब्रवीत्॥ **6.69.1** ॥

एवमेव महावीर्यो हतो नस्तातमध्यमः।
न तु सत्पुरुषा राजन् विलपन्ति यथा भवान्॥ **6.69.2** ॥

नूनं त्रिभुवनस्यापि पर्याप्तस्त्वमसि प्रभो।
स कस्मात् प्राकृत इव शोचस्यात्मानमीदृशम्॥ **6.69.3** ॥

ब्रह्मदत्तास्ति ते शक्तिः कवचं सायको धनुः।
सहस्रखरसंयुक्तो रथो मेघसमस्वनः॥ **6.69.4** ॥

त्वयासकृद्धि शस्त्रेण विशस्ता देवदानवाः।
स सर्वायुधसम्पन्नो राघवं शास्तुमर्हसि॥ **6.69.5** ॥

कामं तिष्ठ महाराज निर्गमिष्याम्यहं रणे।
उद्धरिष्यामि ते शत्रून् गरुडः पन्नगानिव॥ **6.69.6** ॥

शम्बरो देवराजेन नरको विष्णुना यथा।
तथाद्य शयिता रामो मया युधि निपातितः॥ **6.69.7** ॥

श्रुत्वा त्रिशिरसो वाक्यं रावणो राक्षसाधिपः।
पुनर्जातमिवात्मानं मन्यते कालचोदितः॥ **6.69.8** ॥

श्रुत्वा त्रिशिरसो वाक्यं देवान्तकनरान्तकौ।
अतिकायश्च तेजस्वी बभूवुर्युद्धहर्षिताः॥ **6.69.9** ॥

ततोऽहमहमित्येवं गर्जन्तो नैर्ऋतर्षभाः।
रावणस्य सुता वीराः शक्रतुल्यपराक्रमाः॥ **6.69.10** ॥

अन्तरिक्षगताः सर्वे सर्वे मायाविशारदाः।
सर्वे त्रिदशदर्पघ्नाः सर्वे समरदुर्मदाः॥ **6.69.11** ॥

सर्वे सुबलसम्पन्नाः सर्वे विस्तीर्णकीर्तयः।
सर्वे समरमासाद्य न श्रूयन्ते स्म निर्जिताः॥ **6.69.12** ॥

देवैरपि सगन्धर्वैः सकिन्नरमहोरगैः।
सर्वेऽस्त्रविदुषो वीराः सर्वे युद्धविशारदाः।
सर्वे प्रवरविज्ञानाः सर्वे लब्धवरास्तथा॥ **6.69.13** ॥

स तैस्तथा भास्करतुल्यवर्चसैः
    सुतैर्वृतः शत्रुबलश्रियार्दनैः।
रराज राजा मघवान् यथामरै -
    र्वृतो महादानवदर्पनाशनैः॥ **6.69.14** ॥

स पुत्रान् सम्परिष्वज्य भूषयित्वा च भूषणैः।
आशीर्भिश्च प्रशस्ताभिः प्रेषयामास वै रणे॥ **6.69.15** ॥

युद्धोन्मत्तं च मत्तं च भ्रातरौ चापि रावणः।
रक्षणार्थं कुमाराणां प्रेषयामास संयुगे॥ **6.69.16** ॥

तेऽभिवाद्य महात्मानं रावणं लोकरावणम्।
कृत्वा प्रदक्षिणं चैव महाकायाः प्रतस्थिरे॥ **6.69.17** ॥

सर्वौषधीभिर्गन्धैश्च समालभ्य महाबलाः।
निर्जग्मुर्नैर्ऋतश्रेष्ठाः षडेते युद्धकाङ्क्षिणः॥ **6.69.18** ॥

त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ।
महोदरमहापार्श्वौ निर्जग्मुः कालचोदिताः॥ **6.69.19** ॥

ततः सुदर्शनं नागं नीलजीमूतसन्निभम्।
ऐरावतकुले जातमारुरोह महोदरः॥ **6.69.20** ॥

सर्वायुधसमायुक्तस्तूणीभिश्चाप्यलङ्कृतः।
रराज गजमास्थाय सवितेवास्तमूर्धनि॥ **6.69.21** ॥

हयोत्तमसमायुक्तं सर्वायुधसमाकुलम्।
आरुरोह रथश्रेष्ठं त्रिशिरा रावणात्मजः॥ **6.69.22** ॥

त्रिशिरा रथमास्थाय विरराज धनुर्धरः।
सविद्युदुल्कः सज्वालः सेन्द्रचाप इवाम्बुदः॥ **6.69.23** ॥

त्रिभिः किरीटैस्त्रिशिराः शुशुभे स रथोत्तमे।
हिमवानिव शैलेन्द्रस्त्रिभिः काञ्चनपर्वतैः॥ **6.69.24** ॥

अतिकायोऽतितेजस्वी राक्षसेन्द्रसुतस्तदा।
आरुरोह रथश्रेष्ठं श्रेष्ठः सर्वधनुष्मताम्॥ **6.69.25** ॥

सुचक्राक्षं सुसंयुक्तं स्वनुकर्षं सुकूबरम्।
तूणीबाणासनैर्दीप्तं प्रासासिपरिघाकुलम्॥ **6.69.26** ॥

स काञ्चनविचित्रेण किरीटेन विराजता।
भूषणैश्च बभौ मेरुः प्रभाभिरिव भासयन्॥ **6.69.27** ॥

स रराज रथे तस्मिन् राजसूनुर्महाबलः।
वृतो नैर्ऋतशार्दूलैर्वज्रपाणिरिवामरैः ॥ **6.69.28** ॥

हयमुच्चैःश्रवःप्रख्यं श्वेतं कनकभूषणम्।
मनोजवं महाकायमारुरोह नरान्तकः ॥ **6.69.29** ॥

गृहीत्वा प्रासमुल्काभं विरराज नरान्तकः।
शक्तिमादाय तेजस्वी गुहः शिखिगतो यथा ॥ **6.69.30** ॥

देवान्तकः समादाय परिघं हेमभूषणम्।
परिगृह्य गिरिं दोर्भ्यां वपुर्विष्णोर्विडम्बयन् ॥ **6.69.31** ॥

महापार्श्वो महातेजा गदामादाय वीर्यवान्।
विरराज गदापाणिः कुबेर इव संयुगे ॥ **6.69.32** ॥

ते प्रतस्थुर्महात्मानोऽमरावत्याः सुरा इव।
तान् गजैश्च तुरङ्गैश्च रथैश्चाम्बुदनिःस्वनैः ॥ **6.69.33** ॥

अनूत्पेतुर्महात्मानो राक्षसाः प्रवरायुधाः।
ते विरेजुर्महात्मानः कुमाराः सूर्यवर्चसः ॥ **6.69.34** ॥

किरीटिनः श्रिया जुष्टा ग्रहा दीप्ता इवाम्बरे।
प्रगृहीता बभौ तेषां शस्त्राणामावलिः सिता ॥ **6.69.35** ॥

शरदभ्रप्रतीकाशा हंसावलिरिवाम्बरे।
मरणं वापि निश्चित्य शत्रूणां वा पराजयम् ॥ **6.69.36** ॥

इति कृत्वा मतिं वीराः सञ्जग्मुः संयुगार्थिनः।
जगर्जुश्च प्रणेदुश्च चिक्षिपुश्चापि सायकान् ॥ **6.69.37** ॥

जगृहुश्च महात्मानो निर्यान्तो युद्धदुर्मदाः।
क्ष्वेडितास्फोटितानां वै सञ्चचालेव मेदिनी ॥ **6.69.38** ॥

रक्षसां सिंहनादैश्च संस्फोटितमिवाम्बरम्।
तेऽभिनिष्क्रम्य मुदिता राक्षसेन्द्रा महाबलाः ॥ **6.69.39** ॥

ददृशुर्वानरानीकं समुद्यतशिलानगम्।
हरयोऽपि महात्मानो ददृशू राक्षसं बलम् ॥ **6.69.40** ॥

हस्त्यश्वरथसम्बाधं किङ्किणीशतनादितम्।
नीलजीमूतसङ्काशं समुद्यतमहायुधम् ॥ **6.69.41** ॥

दीप्तानलरविप्रख्यैर्नैर्ऋतैः सर्वतो वृतम्।
तद् दृष्ट्वा बलमायातं लब्धलक्षाः प्लवङ्गमाः ॥ **6.69.42** ॥

समुद्यतमहाशैलाः सम्प्रणेदुर्मुहुर्मुहुः।
अमृष्यमाणा रक्षांसि प्रतिनर्दन्त वानराः ॥ **6.69.43** ॥

ततः समुत्कृष्टरवं निशम्य
    रक्षोगणा वानरयूथपानाम्।
अमृष्यमाणाः परहर्षमुग्रं
    महाबला भीमतरं प्रणेदुः ॥ **6.69.44** ॥

ते राक्षसबलं घोरं प्रविश्य हरियूथपाः।
विचेरुरुद्यतैः शैलैर्नगाः शिखरिणो यथा ॥ **6.69.45** ॥

केचिदाकाशमाविश्य केचिदुर्व्यां प्लवङ्गमाः।
रक्षःसैन्येषु सङ्क्रुद्धाः केचिद् द्रुमशिलायुधाः ॥ **6.69.46** ॥

द्रुमांश्च विपुलस्कन्धान् गृह्य वानरपुङ्गवाः।
तद् युद्धमभवद् घोरं रक्षोवानरसङ्कुलम् ॥ **6.69.47** ॥

ते पादपशिलाशैलैश्चक्रुर्वृष्टिमनूपमाम्।
बाणौघैर्वार्यमाणाश्च हरयो भीमविक्रमाः ॥ **6.69.48** ॥

सिंहनादान् विनेदुश्च रणे राक्षसवानराः।
शिलाभिश्चूर्णयामासुर्यातुधानान् प्लवङ्गमाः॥ **6.69.49** ॥

निर्जघ्नुः संयुगे क्रुद्धाः कवचाभरणावृतान्।
केचिद् रथगतान् वीरान् गजवाजिगतानपि॥ **6.69.50** ॥

निर्जघ्नुः सहसाऽऽप्लुत्य यातुधानान् प्लवङ्गमाः।
शैलशृङ्गान्विताङ्गास्ते मुष्टिभिर्वान्तलोचनाः॥ **6.69.51** ॥

चेलुः पेतुश्च नेदुश्च तत्र राक्षसपुङ्गवाः।
राक्षसाश्च शरैस्तीक्ष्णैर्बिभिदुः कपिकुञ्जरान्॥ **6.69.52** ॥

शूलमुद्गरखड्गैश्च जघ्नुः प्रासैश्च शक्तिभिः।
अन्योन्यं पातयामासुः परस्परजयैषिणः॥ **6.69.53** ॥

रिपुशोणितदिग्धाङ्गास्तत्र वानरराक्षसाः।
ततः शैलैश्च खड्गैश्च विसृष्टैर्हरिराक्षसैः॥ **6.69.54** ॥

मुहूर्तेनावृता भूमिरभवच्छोणितोक्षिता।
विकीर्णैः पर्वताकारै रक्षोभिरभिमर्दितैः।
आसीद् वसुमती पूर्णा तदा युद्धमदान्वितैः॥ **6.69.55** ॥

आक्षिप्ताः क्षिप्यमाणाश्च भग्नशैलाश्च वानराः।
पुनरङ्गैस्तदा चक्रुरासन्ना युद्धमद्भुतम्॥ **6.69.56** ॥

वानरान् वानरैरेव जघ्नुस्ते नैर्ऋतर्षभाः।
राक्षसान् राक्षसैरेव जघ्नुस्ते वानरा अपि॥ **6.69.57** ॥

आक्षिप्य च शिलाः शैलाञ्जघ्नुस्ते राक्षसास्तदा।
तेषां चाच्छिद्य शस्त्राणि जघ्नू रक्षांसि वानराः॥ **6.69.58** ॥

निर्जघ्नुः शैलशृङ्गैश्च बिभिदुश्च परस्परम्।
सिंहनादान् विनेदुश्च रणे राक्षसवानराः ॥ **6.69.59** ॥

छिन्नवर्मतनुत्राणा राक्षसा वानरैर्हताः।
रुधिरं प्रसृतास्तत्र रससारमिव द्रुमाः ॥ **6.69.60** ॥

रथेन च रथं चापि वारणेनापि वारणम्।
हयेन च हयं केचिन्निर्जघ्नुर्वानरा रणे ॥ **6.69.61** ॥

क्षुरप्रैरर्धचन्द्रैश्च भल्लैश्च निशितैः शरैः।
राक्षसा वानरेन्द्राणां बिभिदुः पादपाञ्शिलाः ॥ **6.69.62** ॥

विकीर्णाः पर्वतास्तैश्च द्रुमच्छिन्नैश्च संयुगे।
हतैश्च कपिरक्षोभिर्दुर्गमा वसुधाभवत् ॥ **6.69.63** ॥

ते वानरा गर्वितहृष्टचेष्टाः
सङ्ग्राममासाद्य भयं विमुच्य।
युद्धं स्म सर्वे सह राक्षसैस्ते
नानायुधाश्चक्रुरदीनसत्त्वाः ॥ **6.69.64** ॥

तस्मिन् प्रवृत्ते तुमुले विमर्दे
प्रहृष्यमाणेषु वलीमुखेषु।
निपात्यमानेषु च राक्षसेषु
महर्षयो देवगणाश्च नेदुः ॥ **6.69.65** ॥

ततो हयं मारुततुल्यवेग -
मारुह्य शक्तिं निशितां प्रगृह्य।
नरान्तको वानरसैन्यमुग्रं
महार्णवं मीन इवाविवेश ॥ **6.69.66** ॥

स वानरान् सप्त शतानि वीरः
    प्रासेन दीप्तेन विनिर्बिभेद।
एकः क्षणेनेन्द्ररिपुर्महात्मा
    जघान सैन्यं हरिपुङ्गवानाम्॥ **6.69.67** ॥

ददृशुश्च महात्मानं हयपृष्ठप्रतिष्ठितम्।
चरन्तं हरिसैन्येषु विद्याधरमहर्षयः॥ **6.69.68** ॥

स तस्य ददृशे मार्गो मांसशोणितकर्दमः।
पतितैः पर्वताकारैर्वानरैरभिसंवृतः॥ **6.69.69** ॥

यावद् विक्रमितुं बुद्धिं चक्रुः प्लवगपुङ्गवाः।
तावदेतानतिक्रम्य निर्बिभेद नरान्तकः॥ **6.69.70** ॥

ज्वलन्तं प्रासमुद्यम्य सङ्ग्रामाग्रे नरान्तकः।
ददाह हरिसैन्यानि वनानीव विभावसुः॥ **6.69.71** ॥

यावदुत्पाटयामासुर्वृक्षाञ्शैलान् वनौकसः।
तावत् प्रासहताः पेतुर्वज्रकृत्ता इवाचलाः॥ **6.69.72** ॥

दिक्षु सर्वासु बलवान् विचचार नरान्तकः।
प्रमृद्नन् सर्वतो युद्धे प्रावृट्काले यथानिलः॥ **6.69.73** ॥

न शेकुर्धावितुं वीरा न स्थातुं स्पन्दितुं भयात्।
उत्पतन्तं स्थितं यान्तं सर्वान् विव्याध वीर्यवान्॥ **6.69.74** ॥

एकेनान्तककल्पेन प्रासेनादित्यतेजसा।
भग्नानि हरिसैन्यानि निपेतुर्धरणीतले॥ **6.69.75** ॥

वज्रनिष्पेषसदृशं प्रासस्याभिनिपातनम्।
न शेकुर्वानराः सोढुं ते विनेदुर्महास्वनम्॥ **6.69.76** ॥

पततां हरिवीराणां रूपाणि प्रचकाशिरे।
वज्रभिन्नाग्रकूटानां शैलानां पततामिव॥ **6.69.77** ॥

ये तु पूर्वं महात्मानः कुम्भकर्णेन पातिताः।
ते स्वस्था वानरश्रेष्ठाः सुग्रीवमुपतस्थिरे॥ **6.69.78** ॥

प्रेक्षमाणः स सुग्रीवो ददृशे हरिवाहिनीम्।
नरान्तकभयत्रस्तां विद्रवन्तीं यतस्ततः॥ **6.69.79** ॥

विद्रुतां वाहिनीं दृष्ट्वा स ददर्श नरान्तकम्।
गृहीतप्रासमायान्तं हयपृष्ठप्रतिष्ठितम्॥ **6.69.80** ॥

दृष्ट्वोवाच महातेजाः सुग्रीवो वानराधिपः।
कुमारमङ्गदं वीरं शक्रतुल्यपराक्रमम्॥ **6.69.81** ॥

गच्छैनं राक्षसं वीरं योऽसौ तुरगमास्थितः।
क्षोभयन्तं हरिबलं क्षिप्रं प्राणैर्वियोजय॥ **6.69.82** ॥

स भर्तुर्वचनं श्रुत्वा निष्पपाताङ्गदस्तदा।
अनीकान्मेघसङ्काशादंशुमानिव वीर्यवान्॥ **6.69.83** ॥

शैलसङ्घातसङ्काशो हरीणामुत्तमोऽङ्गदः।
रराजाङ्गदसन्नद्धः सधातुरिव पर्वतः॥ **6.69.84** ॥

निरायुधो महातेजाः केवलं नखदंष्ट्रवान्।
नरान्तकमभिक्रम्य वालिपुत्रोऽब्रवीद् वचः॥ **6.69.85** ॥

तिष्ठ किं प्राकृतैरेभिर्हरिभिस्त्वं करिष्यसि।
अस्मिन् वज्रसमस्पर्शं प्रासं क्षिप्र ममोरसि॥ **6.69.86** ॥

अङ्गदस्य वचः श्रुत्वा प्रचुक्रोध नरान्तकः।
सन्दश्य दशनैरोष्ठं निःश्वस्य च भुजङ्गवत्।
अभिगम्याङ्गदं क्रुद्धो वालिपुत्रं नरान्तकः॥ **6.69.87** ॥

स प्रासमाविध्य तदाङ्गदाय
    समुज्ज्वलन्तं सहसोत्ससर्ज।
स वालिपुत्रोरसि वज्रकल्पे
    बभूव भग्नो न्यपतच्च भूमौ॥ **6.69.88** ॥

तं प्रासमालोक्य तदा विभग्नं
    सुपर्णकृत्तोरगभोगकल्पम्।
तलं समुद्यम्य स वालिपुत्र -
    स्तुरङ्गमस्याभिजघान मूर्ध्नि॥ **6.69.89** ॥

निमग्नपादः स्फुटिताक्षितारो
    निष्क्रान्तजिह्वोऽचलसन्निकाशः।
स तस्य वाजी निपपात भूमौ
    तलप्रहारेण विकीर्णमूर्धा॥ **6.69.90** ॥

नरान्तकः क्रोधवशं जगाम
    हतं तुरङ्गं पतितं समीक्ष्य।
स मुष्टिमुद्यम्य महाप्रभावो
    जघान शीर्षे युधि वालिपुत्रम्॥ **6.69.91** ॥

अथाङ्गदो मुष्टिविशीर्णमूर्धा
    सुस्राव तीव्रं रुधिरं भृशोष्णम्।
मुहुर्विजज्वाल मुमोह चापि
    संज्ञां समासाद्य विसिस्मिये च॥ **6.69.92** ॥

अथाङ्गदो मृत्युसमानवेगं
संवर्त्य मुष्टिं गिरिशृङ्गकल्पम्।
निपातयामास तदा महात्मा
नरान्तकस्योरसि वालिपुत्रः॥ **6.69.93** ॥

स मुष्टिनिर्भिन्ननिमग्नवक्षा
ज्वाला वमञ्शोणितदिग्धगात्रः।
नरान्तको भूमितले पपात
यथाचलो वज्रनिपातभग्नः॥ **6.69.94** ॥

तदान्तरिक्षे त्रिदशोत्तमानां
वनौकसां चैव महाप्रणादः।
बभूव तस्मिन् निहतेऽग्र्यवीर्ये
नरान्तके वालिसुतेन सङ्ख्ये॥ **6.69.95** ॥

अथाङ्गदो राममनःप्रहर्षणं
सुदुष्करं तत् कृतवान् हि विक्रमम्।
विसिष्मिये सोऽप्यति वीर्यविक्रमः
पुनश्च युद्धे स बभूव हर्षितः॥ **6.69.96** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनसप्ततितमः सर्गः॥